# सरस्वती स्तोत्रम्

श्वेतपद्मासना देवी श्वेतपुष्पोपशोभिता
श्वेताम्बरधरा नित्या श्वेतगन्धानुलेपना

श्वेताक्षसूत्रहस्ता च श्वेतचन्दनचर्चिता
श्वेतवीणाधरा शुभ्रा श्वेतालङ्कारभूषिता

वन्दिता सिद्धगन्धर्वैरर्चिता सुरदानवैः
पूजिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा

स्तोत्रेणानेन तां देवीं जगद्धात्रीं सरस्वतीम्
ये स्मरन्ति त्रिसन्ध्यायां सर्वां विद्यां लभन्ते ते

इति सरस्वती स्तोत्रं समाप्तम्